# Chapter 12
# विद्याधनम्

Page No 67:

Question 1:

उपयुक्तकथनानां समक्षम् 'आम्', अनुपयुक्तकथनानां समक्षं 'न' इति लिखत-

| | |
|---|---|
| (क) विद्या राजसु पूज्यते। | |
| (ख) वाग्भूषणं भूषणं न। | |
| (ग) विद्याधनं सर्वधनेषु प्रधानम्। | |
| (घ) विदेशगमने विद्या बन्धुजनः न भवति।। | |
| (ङ) सर्वं विहाय विद्याधिकारं कुरु। | |

Answer:

| | |
|---|---|
| (क) विद्या राजसु पूज्यते। | आम् |
| (ख) वाग्भूषणं भूषणं न। | न |
| (ग) विद्याधनं सर्वधनेषु प्रधानम्। | आम् |
| (घ) विदेशगमने विद्या बन्धुजनः न भवति।। | न |
| (ङ) सर्वं विहाय विद्याधिकारं कुरु। | आम् |

Question 2:

अधोलिखितानां पदानां लिङ्ग, विभक्तिं, वचनञ्च लिखत-

| पदानि | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|
| नरस्य | ………….. | ………….. | ………….. |
| गुरूणाम् | ………….. | ………….. | ………….. |
| केयूराः | ………….. | …………….. | ………….. |
| कीर्तिम् | ………….. | ………….. | ………….. |
| भूषणानि | ………….. | ………….. | ………….. |

Answer:

| पदानि | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|
| नरस्य | पुँल्लिङ्गम् | षष्ठी | एकवचनम् |
| गुरूणाम् | पुँल्लिङ्गम् | षष्ठी | बहुवचनम् |
| केयूराः | पुँल्लिङ्गम् | प्रथमा | बहुवचनम् |
| कीर्तिम् | स्त्रीलिङ्गम् | द्वितीया | एकवचनम् |
| भूषणानि | नपुंसकलिङ्गम् | द्वितीया | बहुवचनम् |

Page No 68:

Question 3:

श्लोकांशान् योजयत-

| क | ख |
|---|---|
| विद्या राजसु पूज्यते न हि धनम् | हारा न चन्द्रोज्ज्वलाः। |
| केयूराः न विभूषयन्ति पुरुषम् | न भ्रातृभाज्यं न च भारकारि। |
| न चौरहार्यं न च राजहार्यम् | या संस्कृता धार्यते। |
| सत्कारायतनं कुलस्य महिमा | विद्या-विहिनः पशुः। |
| वाण्येका समलङ्करोति पुरुषम् | रत्नैर्विना भूषणम्। |

Answer:

| क | ख |
|---|---|
| विद्या राजसु पूज्यते न हि धनम् | विद्या-विहिनः पशुः। |
| केयूराः न विभूषयन्ति पुरुषम् | हारा न चन्द्रोज्ज्वलाः। |
| न चौरहार्यं न च राजहार्यम् | न भ्रातृभाज्यं न च भारकारि। |
| सत्कारायतनं कुलस्य महिमा | रत्नैर्विना भूषणम्। |
| वाण्येका समलङ्करोति पुरुषम् | या संस्कृता धार्यते। |

Question 4:

एकपदेन प्रश्नानाम् उत्तराणि लिखत-

(क) कः पशुः?

(ख) का भोगकरी?

(ग) के पुरुषं न विभूषयन्ति?

(घ) का एका पुरुषं समलङ्करोति?

(ङ) कानि क्षीयन्ते?

Answer:

(क) विद्याविहीनः पशुः।

(ख) विद्या भोगकरी।

(ग) केयूराः पुरुषं न विभूषयन्ति।

(घ) वाणी एका पुरुषं समलङ्करोति।

(ङ) अखिल भूषणानि क्षीयन्ते।

Question 5:

रेखाङ्कितपदानि अधिकृत्य प्रश्ननिर्माणं कुरुत-

(क) विद्याविहिनः नरः पशुः अस्ति।

(ख) विद्या राजसु पूज्यते।

(ग) चन्द्रोज्ज्वलाः हाराः पुरुषं न अलङ्कुर्वन्ति।

(घ) पिता हिते नियुङ्क्ते?

(ङ) विद्याधनं सर्वप्रधान धनमस्ति।

(च) विद्या दिक्षु कीर्तिं तोनति।

Answer:

(क) विद्याविहीन: क: पशु: अस्ति?

(ख) का राजसु पूज्यते?

(ग) चन्द्रोज्ज्वला: <u>के</u> पुरुषं न अलङ्कुर्वन्ति?

(घ) <u>क:</u> हिते नियुङ्क्ते?

(ङ) विद्याधनं <u>कथं</u> धनमस्ति?

(च) विद्या <u>कुत्र</u> कीर्तिं तनोति?

Page No 69:

Question 6:

पूर्णवाक्येन प्रश्नानाम् उत्तराणि लिखत-

(क) गुरूणां गुरुः का अस्ति?

(ख) कीदृशी वाणी पुरुषं समलङ्करोति?

(ग) व्यये कृते किं वर्धते?

(घ) भाग्यक्षये आश्रयः कः?

Answer:

(क) गुरूणां गुरुः विद्या अस्ति।

(ख) संस्कृता धार्यते वाणी पुरुषं समलङ्करोति।

(ग) व्यये कृते विद्या वर्धते।

(घ) भाग्यक्षये आश्रयः विद्या अस्ति।

Question 7:

मञ्जूषातः पुँल्लिङ्ग-स्त्रीलिङ्ग-नपुंसकलिङ्गपदानि चित्वा लिखत-

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| विद्या | धनम् | संस्कृता | सततम् | कुसुमम् | मूर्धजाः | पशुः | गुरुः | रतिः |

| | पुँल्लिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|---|
| **यथा-** | हाराः | अलङ्कता | भूषणम् |
| | …………….. | …………….. | …………….. |
| | …………….. | …………….. | …………….. |
| | …………….. | …………….. | …………….. |

Answer:

| | पुँल्लिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|---|
| **यथा-** | हाराः | अलङ्कता | भूषणम् |
| | पशुः | विद्या | धनम् |
| | गुरुः | संस्कृता | कुसुमम् |
| | मूर्धजाः | रतिः | सततम् |